मुकुन्दमालास्तोत्रम्[1]

Version 0.1

कुलशेखरविरचितम्

March 20, 2001

[1]Principal source: *Stava-kalpa-druma*, ed. Bhaktisāraṅga Goswami and Puruṣottama Dāsa, pp. 363-372. (Vrindavan, Bhaktisaurabhasāra, 1959.)

वन्दे मुकुन्दमरविन्ददलायताक्षं
कुन्देन्दुशङ्खदशनं शिशुगोपवेशम् ।
इन्द्रादिदेवगणवन्दितपादपीठं
वृन्दावनालयमहं वसुदेवसूनुम् ॥ १ ॥

श्रीवल्लभेति वरदेति दयापरेति
भक्तप्रियेति भवलुण्ठनकोविदेति ।
नाथेति नागशयनेति जगन्निवासेत्य्
आलापिनं प्रतिदिनं कुरु मां मुकुन्द ॥ २ ॥

जयतु जयतु देवो देवकीनन्दनोऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥ ३ ॥

मुकुन्द मूर्ध्ना प्रणिपत्य याचे
भवन्तं एकान्तं इयन्तमर्थं ।
अविस्मृतिस्त्वच्चरणारविन्दे
भवे भवे मेऽस्तु भवत्प्रसादात् ॥ ४ ॥

श्रीगोविन्दपदाम्भोजमधुनो महदद्भुतम् ।
यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥ ५ ॥

नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः
कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुं ।
रम्यारामामृदुतनुलता नन्दने नापि रन्तुं
भावे भावे हृदयभवने भावयेयं भवन्तं ॥ ६ ॥

नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्भाव्यं तद्भवतु भगवन् पूर्वकर्मानुरूपं ।
एतत् प्रार्थ्यं मम बहु मतं जन्मजन्मान्तरेऽपि
त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥ ७ ॥

दिवि वा भुवि वा ममास्तु वासो

नरके वा नरकान्तक प्रकामं ।
अवधीरितशारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि ॥ ८ ॥

सरसिजनयने सशङ्खचक्रे
मुरभिदि मा विरमस्व चित्त रन्तुम् ।
सुखतरमपरं न जातु जाने
हरिचरणस्मरणामृतेन तुल्यम् ॥ ९ ॥

चिन्तयामि हरिं एव सन्ततं
मन्दहासमुदिताननाम्बुजम्
नन्दगोपतनयं परात् परम्
नारदादिमुनिवृन्दवन्दितम् ॥ १० ॥

करचरणसरोजे कान्तिमन्नेत्रमीने
श्रममुषि भुजवीचिव्याकुलेऽगाधमार्गे ।
हरिसरसि विगाह्यापीय तेजोजलौघं
भवमरुपरिखिन्नः क्लेशमद्य त्यजामि ॥ ११ ॥

हे लोकाः श्रीनुत प्रसुतिमरनव्यधेस् चिकित्सं इमम्
योगज्ञः समुदहरन्ति मुनयो यं यज्ञवल्क्यदयह् ।
अन्तर्ज्योतिरमेयं एकममृतं कृष्णख्यमपियतम्
तत् पितं परमौषधं वितनुते निर्वनमत्यन्तिकम् ॥ १२ ॥

हे मर्त्याः परमं हितं श्रीनुत वो वक्ष्यमि सङ्क्षेपतः
संसारर्नवमपद्रुर्मिबहुलं सम्यक् प्रविस्य स्थितः
ननज्ञनमपस्य चेतसि नमो नारायणयेत्य् अमुम्
मन्त्रं सप्रनवं प्रनमसहितं प्रवर्तयध्वं मुहुः ॥ १३ ॥

माभीर्मन्दमनो विचिन्त्य बहुधा यमीश्वरं यातना
नैवामी प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणम्
लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥ १४ ॥

भवजलधिगतानां द्वन्द्ववाताहतानां
सुतदुहितृकलत्रत्राणभारार्दितानाम् ।
विषमविषयतोये मज्जतामाप्लवानां
भवति शरणमेको विष्णुपोतो नराणाम् ॥ १५ ॥

रजसि निपतितानां मोहजालावृतानां
जननमरणदोलादुर्गसंसर्गगानाम् ।
शरणमशरणानामेक एवातुराणां
कुशलपथनियुक्तश्चक्रपाणिर्नराणाम् ॥ १६ ॥

अपराधसहस्रसङ्कुलं
पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे
कृपया केवलमात्मसात् कुरु ॥ १७ ॥

मा मे स्त्रीत्वं मा च मे स्यात् कुभावो
मा मूर्खत्वं मा कुदेशेषु जन्म ।
मिथ्यादृष्टिर्मा च मे स्यात् कदाचित्
जातौ जातौ विष्णुभक्तो भवेयम् ॥ १८ ॥

कायेन वाचा मनसेन्द्रियैश्च
बुद्ध्यात्मना वानुसृतिस्र्वभावात् ।
करोमि यद्यत् सकलं परस्मै
नारायणायैव समर्पयामि ॥ १९ ॥

यत् कृतं यत् करिष्यामि
तत् सर्वं न मया कृतम् ।
तव्या कृतं तु फलभुक्
त्वमेव मधुसूदन ॥ २० ॥

भवजलधिमगाधं दुस्तरं निस्तरेयं
कथमहमिति चेतो मा स्म गाः कातरत्वम् ।
सरसिजदृशि देवे तारकी भक्तिरेका

नरकभिदि निषण्णा तारयिष्यत्य् अवश्यम् ॥ २१ ॥

तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले
दारावर्ते तनयसहजग्राहसङ्घाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादाम्भोजे वरद भवतो भक्तिनावं प्रयच्छ ॥ २२ ॥

पृथ्वीरेणुरणुः पयांसि कणिकाः फल्गुः स्फुलिङ्गो लघुस्
तेजो निःश्वसनं मरुत् तनुतरं रन्ध्रं सुसूक्ष्मं नभः ।
क्षुद्रा रुद्रपितामहप्रभृतयः किटाः समस्ताः सुरा
दृष्टे यत्र स तारको विजयते श्रीपादधूलिकणाः ॥ २३ ॥

नाथे नः पुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि परे नारायणे तिष्ठति ।
यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका वयम् ॥ २४ ॥

बद्धेनाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैः
कण्ठेन स्वरगद्गदेन नयनेनोद्गीर्णबाष्पाम्बुना ।
नित्यं त्वच्चरणारविन्दयुगलध्यानामृतास्वादिनाम्
अस्माकं सरसीरुहाक्ष सततं सम्पद्यतां जीवितम् ॥ २५ ॥

यत् कृष्णप्रणिपातधूलिधवलं तद्वर्ष्म तद्वै शिरस्
ते नेत्रे तमसोज्झिते सुरुचिरे याभ्यां हरिर्दृश्यते ।
सा बुद्धिर्विमलेन्दुशङ्खधवला या माधवध्यायिनी
सा जिःवामृतवर्षिणी प्रतिपदं या स्तौति नारायणम् ॥ २६ ॥

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरम्
पाणिद्वन्द्वसमर्चयाच्युतकथाः श्रोत्रद्वय त्वं शृणु ।
कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयम्
जिघ्र घ्राण मुकुन्दपदतुलसीं मूर्धन् नमाधोक्षजम् ॥ २७ ॥

आम्नायाभ्यसनान्य् अरण्यरुदितं वेदव्रतान्य् अन्वहम्

मेदस्छेदफलानि पूर्तविधयः सर्वं हुतं भस्मनि ।
तीर्थानामवगाहनानि च गजस्नानं विना यत्पद
द्वन्द्वाम्भोरुहसंस्मृतिं विजयते देवः स नारायणह् ॥ २८ ॥

मदन परिहर स्थितिं मदीये
मनसि मुकुन्दपदारविन्दधाम्नि ।
हरनयनकृशानुना कृशोऽसि
स्मरसि न चक्रपराक्रमं मुरारेः ॥ २९ ॥

नाथे धातरि भोगिभोगशयने नारायणे माधवे
देवे देवकिनन्दने सुरवरे चक्रायुधे शार्ङ्गिणि ।
लीलाशेषजगत्प्रपञ्चजठरे विश्वेश्वरे श्रीधरे
गोविन्दे कुरु चित्तवृत्तिमचलमन्यैस्तु किं वर्तनैः ॥ ३० ॥

मा द्राक्षं क्षीणपुण्यान् क्षणमपि भवतो भक्तिहीनान् पदाब्जे
मा श्रौषं श्राव्यबन्धं तव चरितमपास्यान्यदाख्यानजातम् ।
मा स्मार्षं माधव त्वामपि भुवनपते चेतसापह्नुवानान्
मा भूवं त्वत्सपर्याव्यतिकररहितो जन्मजन्मान्तरेऽपि ॥ ३१
॥

मज्जन्मनः फलं इदं मधुकैतभारे
मत्प्रार्थनीयमदनुग्रह एष एव ।
त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्य
भृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥ ३२ ॥

तत्त्वं ब्रुवाणानि परं परस्तान्
मधु क्षरन्तीव मुदावहानि ।
प्रवर्तय प्राञ्जलिरस्मि जिह्वे
नामानि नारायणगोचराणि ॥ ३३ ॥

नमामि नारायणपादपङ्कजं
करोमि नारायणपूजनं सदा ।
वदामि नारायणनाम निर्मलं

स्मरामि नारायणतत्त्वमव्ययम् ॥ ३४ ॥

श्रीनाथ नारायण वासुदेव
श्रीकृष्ण भक्तप्रिय चक्रपाणे ।
श्रीपद्मनाभाच्युत कैतभारे
श्रीराम पद्माक्ष हरे मुरारे ॥ ३५ ॥

अनन्त वैकुण्ठ मुकुन्द कृष्ण
गोविन्द दामोदर माधवेति ।
वक्तुं समर्थोऽपि न वक्ति कश्चिद्
अहो जनानां व्यसनाभिमुख्यम् ॥ ३६ ॥

भक्तापायभुजङ्गगारुडमणिस्त्रैलोक्यरक्षामणिर्
गोपीलोचनचाटकाम्बुदमणिः सौन्दर्यमुद्रामणिः
यः कान्तमणिरुक्मिणीघनकुचद्वन्द्वैकभूषामणिः
श्रेयो देवशिखामणिर्दिशतु नो गोपालचूडामणिः ॥ ३७ ॥

शत्रुच्छेदैकमन्त्रं सकलं उपनिषद्वाक्यसम्पूज्यमन्त्रं
संसारोच्छेदमन्त्रं समुचिततमसः सङ्घनिर्याणमन्त्रम् ।
सर्वैश्वर्यैकमन्त्रं व्यसनभुजगसन्दष्टसन्त्राणमन्त्रं
जिह्वे श्रीकृष्णमन्त्रं जप जप सततं जन्मसाफल्यमन्त्रम् ॥ ३८ ॥

व्यामोहप्रशमौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधं
दैत्येन्द्रार्तिकरौषधं त्रिभुवने सञ्जीवनैकौषधम् ।
भक्तात्यन्तहितौषधं भवभयप्रध्वम्सनैकौषधं
श्रेयःप्राप्तिकरौषधं पिब मनः श्रीकृष्णदिव्यौषधम् ॥ ३९ ॥

कृष्ण त्वदीयपदपङ्कजपञ्जरान्तम्
अद्यैव मे विशतु मानसराजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः
कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥ ४० ॥

चेतस् चिन्तय कीर्तयस्व रसने नम्रीभव त्वं सिरो

हस्तावञ्जलिसम्पुटं रचयतं वन्दस्व दीर्घं वपुः ।
आत्मन् संश्रय पुण्डरीकनयनं नागाचलेन्द्रस्थितं
धन्यं पुण्यतमं तदेव परमं दैवं हि सत्सिद्धये ॥ ४१ ॥

शृण्वन् जनार्दनकथागुणकीर्तनानि
देहे न यस्य पुलकोद्गमरोमराजिः ।
नोत्पद्यते नयनयोर्विमलाम्बुमाला
धिक् तस्य जीवितमहो पुरुषाधमस्य ॥ ४२ ॥

अन्धस्य मे हृतविवेकमहाधनस्य
चौरैः प्रभो बलिभिरिन्द्रियनामधेयैः ।
मोहान्धकूपकुहरे विनिपातितस्य
देवेश देहि कृपाणस्य करावलम्बम् ॥ ४३ ॥

इदं शरीरं शतसन्धिजर्जरं
पतत्य् अवश्यं परिणामपेशलं ।
किमौषधं पृच्छसि मूढ दुर्मते
निरामयं कृष्णरसायणं पिब ॥ ४४ ॥

आश्चर्यमेतद्धि मनुष्यलोके
सुधां परित्यज्य विषं पिबन्ति ।
नामानि नारायणगोचराणि
त्यक्त्वान्यवाचः कुहकः पठन्ति ॥ ४५ ॥

त्यजन्तु बान्धवाः सर्वे
निन्दन्तु गुरवो जनाः ।
तथापि परमानन्दो
गोविन्दो मम जीवनम् ॥ ४६ ॥

सत्यं ब्रवीमि मनुजाः स्वयं ऊर्ध्वबाहुर्
यो यो मुकुन्द नरसिंह जनार्दनेति ।
जीवो जपत्य् अनुदिनं मरणे रणे वा
पाषाणकाष्ठसदृशाय ददात्य् अभीष्टम् ॥ ४७ ॥

नारायणाय नम इत्य् अमुं एव मन्त्रं
संसारघोरविषनिर्हरणाय नित्यम् ।
शृण्वन्तु भव्यमतयो यतयोऽनुरागाद्
उच्चैस्तरं उपदिशाम्य् अहं ऊर्ध्वबाहुह् ॥ ४८ ॥

चित्तं नैव निवर्तते क्षणमपि श्रीकृष्णपादाम्बुजान्
निन्दन्तु प्रियबान्धवा गुरुजना गृःनन्तु मुञ्चन्तु वा ।
दुर्वादं परिघोषयन्तु मनुजा वंशे कलङ्कोऽस्तु वा
तादृक्प्रेमधरानुरागमधुना मत्ताय मानं तु मे ॥ ४९ ॥

कृष्णो रक्षतु नो जगत्त्रयगुरुः कृष्णो हि विश्वम्भरः
कृष्णादेव समुत्थितं जगदिदं कृष्णे लयं गच्छति ।
कृष्णे तिष्ठति विश्वं एतदखिलं कृष्णस्य दासा वयं
कृष्णेनाखिलसद्गतिर्वितरिता कृष्णाय तस्मै नमः ॥ ५० ॥

हे गोपालक हे कृपाजलनिधे हे सिन्धुकन्यापते
हे कंसान्तक हे गजेन्द्रकरुणापारीण हे माधव ।
हे रामानुज हे जगत्त्रयगुरो हे पुण्डरीकाक्ष मां
हे गोपीजननाथ पालय परं जानामि न त्वां विना ॥ ५१ ॥

दारावाराकरवरसुता ते तनूजो विरिञ्चिः
स्तोता वेदस्तव सुरगणा भृत्यवर्गः प्रसादः ।
मुक्तिर्माया जगदविकलं तावकी देवकी ते
माता मित्रं बलरिपुसुतस्तत् त्वदन्यं न जाने ॥ ५२ ॥

प्रणाममीशस्य शिरःफलं विदुस्
तदर्चनं पाणिफलं दिवौकसः ।
मनःफलं तद्गुणतत्त्वचिन्तनं
वचःफलं तद्गुणकीर्तनं बुधाः ॥ ५३ ॥

श्रीमन्नाम प्रोच्य नारायणाख्यं
के न प्रापुर्वाञ्छितं पापिनोऽपि ।

हा नः पूर्वं वाक्प्रवृत्ता न तस्मिंस्
तेन प्राप्तं गर्भवासादिदुःखम् ॥ ५४ ॥

ध्यायन्ति ये विष्णुमनन्तमव्ययम्
हृत्पद्ममध्ये सततं व्यवस्थितम् ।
समाहितानां सतताभयप्रदं
ते यान्ति सिद्धिं परमां तु वैष्णवीम् ॥ ४८ ॥

तत् त्वं प्रसीद भगवन् कुरु मय्य् अनाथे
विष्णो कृपां परमकारुणिकः खलु त्वम् ।
संसारसागरनिमग्नमनन्त दीनम्
उद्धर्तुमर्हसि हरे पुरुषोत्तमोऽसि ॥ ५६ ॥

क्षीरसागरतरङ्गशीकरा
सारतारकितचारुमूर्तये ।
भोगिभोगशयनीयशायिने
माधवाय मधुविद्विषे नमः ॥ ५७ ॥

अलमलमलमेका प्राणिनां पातकानां
निरसनविषये या कृष्ण कृष्णेति वाणी ।
यदि भवति मुकुन्दे भक्तिरानन्दसान्द्रा
करतलकलिता सा मोक्षसम्राज्यलक्ष्मीः ॥ ५८ ॥

यस्य प्रियौ श्रुतिधरौ कविलोकवीरौ
मित्रौ द्विजन्मवरपद्मशरावभूताम् ।
तेनाम्बुजाक्षचरणाम्बुजषट्पदेन
राज्ञा कृता कृतिरियं कुलशेखरेण ॥ ५९ ॥

मुकुन्दमालां पठतां नराणाम्
अशेषसौख्यं लभते न कः स्वित् ।
समस्तपापक्षयमेत्य देही
प्रयाति विष्णोः परमं पदं तत् ॥ ६० ॥